# Svachchandabhairava Smaranam

# સ્વચ્છન્દભૈરવસ્મરણમ્

## Document Information

Text title : Svachchandabhairava Smaranam

File name : svachChandabhairavasmaraNam.itx

Category : shiva

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Latest update : October 13, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 13, 2025

*sanskritdocuments.org*

# સ્વચ્છન્દભૈરવસ્મરણમ્

ત્રિપઞ્ચનયનં દેવં જટામુકુટમણ્ડિતમ્ ।
ચન્દ્રકોટિપ્રતીકાશં ચન્દ્રાર્ધકૃતશેખરમ્ ॥ ૧॥

પઞ્ચવક્ત્રં વિશાલાક્ષં સર્પગોનાસમણ્ડિતમ્ ।
વૃશ્ચિકૈરગ્નિવર્ણાભૈર્હરિણ તુ વિરાજિતમ્ ॥ ૨॥

કપાલમાલાભરણં મુણ્ડખેટકધારિણમ્ ।
પાશાઙ્કુશધરં દેવં શરહસ્તં પિનાકિનમ્ ॥ ૩॥

વરદાભયહસ્તં ચ ખડ્ગખટ્વાઙ્ગધારિણમ્ ।
વીણાડમરૂહસ્તં ચ ઘણ્ટાહસ્તં ત્રિશૂલિનમ્ ॥ ૪॥

વજ્રદણ્ડકૃતાટોપં પરશ્વાયુધહસ્તકમ્ ।
મુદ્ગરેણ વિચિત્રેણ વર્તુલેન વિરાજિતમ્ ॥ ૫॥

સિંહચર્મપરીધાનં ગજચર્મોત્તરીયકમ્ ।
અષ્ટાદશભુજં દેવં નીલકણ્ઠં સુજેતસમ્ ॥ ૬॥

ઊર્ધ્વવક્ત્રં મહેશાનિ સ્ફટિકાભં વિચિન્તયે ।
આપીતં પૂર્વવક્ત્રં તુ નીલોત્પલદલપ્રભગૃ ॥ ૭॥

દક્ષિણં તુ વિચિન્ત્યાહં વામં ચૈવ વિચિન્તયે ।
દાડિમીકુસુમપ્રખ્યં કુઙ્કુમોદકસન્નિભમ્ ॥ ૮॥

ચન્દ્રાર્બુદપ્રતીકાશં પશ્ચિમં ચ વિચિન્તયે ।
સ્વચ્છન્દભૈરવં દેવં સર્વકામફલપ્રદમ્ ॥ ૯॥

યાદૃશં ભૈરવં રૂપં ભૈરવ્યાસ્તાદૃગેવ હિ ।
શ્રીમદ્ભૈરવનાથસ્ય તસ્મોસઙ્ગે વિરાજિતામ્ ॥ ૧૦॥

ઈષત્કરાલવદનાં ગમ્ભીરવિપુલસ્વનામ્ ।
પ્રસન્નાસ્યાં સદા ધ્યાયે ભૈરવીં વિસ્મિતેક્ષણામ્ ॥ ૧૧॥

સ્વચ્છન્દભૈરવં ચૈવમઘોરાં શક્તિમુત્તમામ્ ।
ધ્યાયન્ ભક્ત્યા તુ યુક્તાત્મા ક્ષિપ્રં સિધ્દ્યતિ માનવઃ ॥ ૧૨॥

॥ ઇતિ સ્વચ્છન્દભૈરવસ્મરણં સમ્પૂર્ણમ્ ॥

Proofread by Ruma Dewan

---

*Svachchandabhairava Smaranam*

pdf was typeset on October 13, 2025

Please send corrections to *sanskrit@cheerful.com*